(1) शंकराचार्य विरचित व्रत सूची
[illegible] x 15.2 x 0.16 cm.
[illegible] - 1 पृष्ठ - 2

PRINTED BOOK

56


**THE VEDIC PATH**
Quarterly Journal of Vedic, Indological
and Scientific Research
Gurukula Kangri Vishwavidyalaya,
HARDWAR


To,

_______________________________

_______________________________

_______________________________


*If not delivered, please return to :*
Dr. R. L. Varshney
*Editor, Vedic Path*
'Dreamland'
P. O. Gurukula Kangri-249 404
HARDWAR, U. P., INDiA.


CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ॐ

श्रीगणेशायनमः वज्रसूचींप्रवक्ष्यामिशास्त्रमज्ञा
नभेदनं दूषणंज्ञानहीनानां भूषणंज्ञानचक्षुषां
१ ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारोवर्णाः तेषां
ब्राह्मणःप्रधानः इतिवेदवचनान्निरूपितंस्मृ
तिभिरुक्तं तत्रचोद्यमस्तिकोनाम किंजीवः किं ब्राह्म
देहः किंजातिः किंवर्णः किंकर्म किंपाण्डित्यं णः×
किंधर्मः किंधार्मिकं इत्यष्टौविकल्पाः प्रथमो
जीवोब्राह्मण इतिचेन्नहि सर्वस्यापिजन्तुजी
वस्यैकरूपत्वात् तस्माज्जीवोब्राह्मणो नभव
त्येव अन्यच्च देहोब्राह्मण इतिचेन्नहिसर्वेषा
मा चाण्डालपर्यन्तानां मनुष्याणां देहस्यजरामर
णधर्मदर्शनात् तस्माद्देहोब्राह्मणोनभवत्ये
व पुनर्देहोब्राह्मण इतिचेत् अपिच पितृमातृ
शरीरदहनात्पुत्रादीनां ब्रह्महत्यादिदोषःसंभ
वेत्तस्माद्देहोब्राह्मणोनभवत्येव जातिर्ब्राह्म
णइतिचेन्नहि अन्यजातिसमुद्भवामहर्ष
योबहवःसन्ति यथा ऋष्यशृंगोमृग्याः कौ
शिकःकुशात्संवे गौतमःशशपृष्ठे हस्ताम
लोहस्तिन्यां व्यासःकैवर्तकन्यायां।वसिष्ठो
वेश्यायां विश्वामित्रःक्षत्रियायां अगस्त्यःक
लशाज्जातः इतिश्रूयतेपुराणेषु एतेषांजात्या
विनापिसम्यकज्ञानविशेषात् ब्राह्मण्यमनु
त्तमंश्रूयते तस्माज्जात्याब्राह्मणोनभवत्ये
व अन्यच्च वर्णोब्राह्मण इतिचेत् नहिब्रा
ह्मणः श्वेतवर्णः क्षत्रियोरक्तवर्णः वैश्यः
पीतवर्णः शूद्रःकृष्णवर्णः एतेषांसर्वेषां
ब्राह्मणादीनांवर्णसंकरदर्शनात् तस्मा
द्वर्णोब्राह्मणोनभवत्येव अन्यच्च कर्मब्रा
ह्मणइतिचेन्न तस्माद्ब्राह्मणाः श्वेतवर्णः
त्रातवर्णाज्जीवति क्षत्रियस्तदर्जीवति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वश्यस्तद्भृस्तदभ्रमात्मियमाभावात्कम०
ब्राह्मणेन भवत्येव अन्यच्च पांडित्यं ब्राह्मण इति
चेन्न नहि क्षत्रियवैश्यशूद्रादयोपि पदपदार्थवा
क्यप्रमाणपटवो बहवः संति तस्मात्पांडित्यं ब्राह्म
णेन भवत्येव अन्यच्च धर्मो ब्राह्मण इति चेन्न
नहि क्षत्रियवैश्यादयोपि इष्टापूर्त्तादिधर्मकारि
णो बहवः तस्माद्धर्मोपि न ब्राह्मणः धार्मिको ब्रा
ह्मण इति चेन्न क्षत्रियादयोपि कन्यादानगोहिर
ण्यमहिष्यादिदातारो बहवः संति तस्माद्धार्मि
को ब्राह्मणेन भवत्येव किंतु करतलामलकव
त्स्वरूपं परोक्षेण ब्रह्म कृतार्थतया कामरागद्वे
षादिरहितः शमदमादिसंतोषवान् मात्सर्यतृ
ष्णाशमोहादिदुष्टार्थो निवृत्तः स एव ब्राह्मण उच्य
ते तथाहि जन्मना जायते शूद्रः संस्काराद्द्विज उ
च्यते वेदभ्यासाद्भवेद्विप्रो ब्रह्मज्ञानाति ब्राह्म
णः अत एव ब्रह्मविदेव ब्राह्मणो नान्य इति नि
श्चयः कर्मयोगी च विहंगमः अनेरालंस्वरालयं
सत्यं वैकुंठ कैलाससीरोब्धिमेव तथा विश्व
रूपं च चैतन्यमेतन्मायास्वरूपकं मायापरं भवि
ब्रह्म तत्परब्रह्म केवलं योगी देहाभिमान्यवत
च्छेनाभिमानिता किंकरोमि क्व गच्छामि किं
गृह्णामि त्यजामि किं आत्मनापूरितं सर्वमह
त्कल्पांबुना यथा किंतु केचिद्वदंति निरवय
व दोषगुणातीत वस्तुज्ञानं मोक्षः केचिद्वदंति
साकारस्य विनाशोस्ति निराकारस्य शून्यतो भ
यपक्षविहीन वस्तुज्ञानं मोक्षः केचिदेकदे
शीय सिद्धांत कथित भक्ति विधानं मोक्षः के
चिद्व्यापकसकलागमशास्त्रार्थनिर्दिष्टाचार
करणं मोक्षः केचिदेकदेशिक व्यापकस्वाचा
रनानाचारकरणविवर्जितो मोक्षः केचिन्मनो
वांछाविकल्पविच्छेदनलक्षणो मुख्यः केचिन्
मनः पवन ध्येय ध्यान धारणाकरणं मोक्षः
केचिद्दृश्यपाद्दृश्योभयज्ञानाभावो मोक्षः केचि
न्महावाक्यविवरणो मोक्षः केचिन्मद्यमांसा
[illegible] मा [illegible] या

× [illegible] ×

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

3

मोक्षः केचिदग्निनाशीनुभय ज्ञानविच्छेदे मोक्षः के
चित्सोहंभावासमरस्ये मोक्षः केचित्स्वात्मानंदबोधम
यो मोक्षः केचिज्जटास्थापनभस्मोत्कलनमोनागीका
रादेव मोक्षः केचिन्नानातीर्थयात्राजपहवनदानव्र
तैरेव मोक्षः केचित्स्थावरजंगमजात्याहिंसाकेशोत्
पाटनाभ्यासादेव मोक्षः एतेषां सकल्पात्सावदर्शी
नभेदावहवः संति तर्हि न भवति मोक्षपदं सर्वे ग्रामि
ति किंतु यो महावाक्यविवरणेनोक्तं समष्टिव्यष्टि
रूपोयं प्रपंचः तच्छ्रवणं सकलं परित्यज्य अखल
रूपत्वंगीकृत्य यज्जीवेश्वरयोरैक्यमेव मोक्षः स
कथं यथा महाकाशो घटमठोपाधिर्विद्यते तस्य प्र
ध्वंसे महाकाशः प्रसिद्धः तथा जीवेश्वरयोरैक्यम्
एव मोक्षः तथाहि वेदांतावकृतर्ककर्कशामपि
ग्रस्ताः परमायया भट्टाः कर्मकलाकुलाहतधि
यो द्वैतेति वैशेषिकाः अन्ये भेदरता विवादकल
हेनास्ते न तत्वतो वंचितास्तस्मात्सिद्धमतं स्वभावक
मिदं धीरः परं संश्रयेत् १ नानास्त्रीयस्वतंत्रवा
दपटवो मायाधिकारावृताः सांख्या वै सवैदि
का विधिपराः संन्यासिनस्तांत्रिकाः सौरा नील
पटाः प्रपंचनिरता बौद्धा जिनाः श्रावकाः एतेक
ष्टरताः क्रियावधिगतास्ते न तत्वतो वंचितास्तस्मा
त्० २ शैवाः पाशुपता महाव्रतधराः कौलाम
खा जंगमाः गाणेशाः सकलेषु दंगणपतिं ध्या
यंति चित्ते निशं शाक्ताः कौलकलात्मचारनि
रताः कापालिकाः शांभवाः एते न्येहन तत्रमं
त्रनिरतास्ते न तत्वतो० ३ आचार्याव हठी ति
ताकुतरस्नानग्नव्रतालापसाः नानातीर्थनि
षेवकाजपपराः मौन्यास्थिता नित्यशः नित्य
ध्यानशनात्महृन्निवेदनावधानाः परं एतेन ख
लुदुःखभारनिरतास्ते न तत्वतो० ४ चार्वाकाश्च न
रास्तिकास्तत्र निपुणा देहात्मवादे रताः सर्वेषां मति
राप्तिदुः सहपरा द्वैते पराः शाक्तिकाः कर्तारं
[illegible] निर्दयाः ते नामादिके [illegible]
कल्पमेव विफलं नैवास्ति मोक्षः परं ५ दत्तानी

दिना

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महावाक्यार्थज्ञानेन बोधः किंपुनः यमनियमादि
साधनसंपन्नानामधिकारिणामनुग्रहाय अहिं
सासत्यास्तेयब्रह्मचर्यापरिग्रहाः एते यमाः शौचसं
तोषतपःस्वाध्यायईश्वरप्रणिधानानि नियमाः
तत्र महावाक्ये तत्पदं त्वंपदं चेति पदद्वयमस्ति त
त्पदस्य त्वंपदस्य च वाच्यं लक्ष्यं चार्थमाह तत्प
दस्य वाच्यः मायोपाधिः सकलजगदुत्पत्तिस्थिति
लयकारणत्वात्सर्वज्ञः सर्वेश्वरत्वात्सर्वशक्ति
मान्सर्वकामप्रदश्च परोक्षेण सह वर्तमानः सम
स्तानंदमद्वितीयं चैतन्यं तत्पदवाच्यार्थ इ
ति सर्वज्ञः सर्वशक्तिमान् सर्वेश्वरः सर्वकामप्रदो
पि न भवति परोक्षोपि न किंतु केवलं सत्यज्ञाना
नंदाद्वितीयस्वरूपं चैतन्यमिति तत्पदलक्ष्यार्थः
त्वंपदवाच्यार्थस्तु श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणेति पं
चज्ञानेंद्रियसहितः प्राणापानसमानोदानव्यान
नागकूर्मकृकलदेवदत्तधनंजयदशवायुसहि
तः मनोबुद्ध्यहंकारचित्तसंज्ञांतःकरणचतुष्टय
सहितः शब्दस्पर्शरूपरसगंधवचनादानगमन
विसर्गानंदसंकल्पनिश्चयाभिमानानुसंधाना
त्मकचतुर्दशविषयसहितः आधिभौतिकाधि
दैवाध्यात्मिकतापत्रयसहितः सत्वरजस्तमोगुण
सहितः पुत्रैषणालोकैषणासहितः भूतभविष्य
वर्तमानकालत्रयसहितः अशनायापिपासा
शोकमोहजरामरणषडूर्मिसहितः असत्य स
जातिविजातिस्वगतं त्रयोभेद ज्ञानमद्वितीय
चैतन्यमस्ति जायते वर्धते विपरिणमते अपक्षीय
ते विनश्यति चेति षड्विकारसहितः अयं त्वंप
दवाच्यार्थः एतत्सर्वोक्तविशेषणरहितं त्वंपद
लक्ष्यार्थः सत्यं ज्ञानमनंतं ब्रह्मेति सत्यमित्येकं ब्र
ह्मेति किमेतावन्निवृत्तिरस्ति इति चेत् स
कुलराहसत्यशब्देनाविनाशित्वमुच्यते ज्ञानश
ब्देन ज्ञानस्वरूपमुच्यते अखंडशब्देनाख
च्यते ब्रह्मशब्देन परिपूर्णत्वमुच्यते एकमेवाद्वि
तीयं चैतन्यं ब्रह्म तत्त्वमसि ब्रह्माहमस्मि अ
हं ब्रह्मास्मि [illegible] योऽसावादित्ये [illegible]

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA